श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ अधिकारपरिग्रहपद्धतिः षष्ठी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ अधिकारपरिग्रहपद्धतिः षष्ठी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

अधीष्टे पादुका सा मे यस्याः साकेतवासिभिः।
अन्वयव्यतिरेकाभ्यामन्वमीयत वैभवम्॥ ६.१ ॥

मोचितस्थिरचरान् अयत्नतः कोसलान् जनपदान् उपास्महे।
येषु कांश्चन बभूव वत्सरान् दैवतं दनुजवैरिपादुका॥ ६.२ ॥

साम्राज्यसम्पदिव दासजनोचिता त्वं
    रामेण सत्यवचसा भरताय दत्ता।
स त्वां निवेश्य चरणावनि ! भद्रपीठे
    पृथ्वीं बुभोज बुभुजे च यशोविभूतिम्॥ ६.३ ॥

भोगान् अनन्यमनसां मणिपादुके ! त्वं
    पुष्णासि हन्त भजतामनुषङ्गसिद्धान्।
तेनैव नूनमभवत् भरतस्य साधोः
    अप्रार्थितं तदिह राज्यमवर्जनीयम्॥ ६.४ ॥

रामप्रयाणजनितं व्यपनीय शोकं
    रत्नासने स्थितवती मणिपादरक्षे !।
पृथ्वीं निजेन यशसा विहितोत्तरीयाम्
    एकातपत्रतिलकां भवती वितेने॥ ६.५ ॥

रामाज्ञया परवती परिगृह्य राज्यं
    रत्नासनं रघुकुलोचितमाश्रयन्ती।
शुद्धां पदावनि ! पुनर्भवती वितेने
    स्वातन्त्र्यलेशकलुषां भरतस्य कीर्तिम्॥ ६.६ ॥

पौलस्त्यवीरवदनस्तबकावसानात्
    पुष्पाणि दण्डकवनेष्वपचेतुमिच्छोः।
रक्षाधुरं धृतवती मणिपादुके ! त्वं
    रामस्य मैथिलसुतासहिते प्रचारे॥ ६.७ ॥

पादावनि ! प्रचलचामरबृन्दमध्ये
    भद्रासनास्तरगता भवती विरेजे।
आकीर्णदिव्यसलिले कटके सुमेरोः
    अम्भोजिनीव कलहायितहंसयूथा॥ ६.८ ॥

मान्ये रघूद्वहपदे मणिपादुके ! त्वां
    विन्यस्य विग्रहवतीमिव राज्यलक्ष्मीम्।
आलोलम् अक्षवलयी भरतो जटावान्
    आलम्ब्य चामरम् अनन्यमनाः सिषेवे॥ ६.९ ॥

प्राप्ते दिवं दशरथे भरते विलक्षे
    पर्याकुलेषु भृशमुत्तरकोसलेषु।
त्वं चेत् उपेक्षितवती क इवाभविष्यद्
    गोपायिता गुहसखस्य विभोः पदं तत्॥ ६.१० ॥

भ्रातुर्यदम्ब ! विरहात् भरते विषण्णे
    दाक्षिण्यमाश्रितवती मणिपादुके ! त्वम्।
आसीदशेषजगतां श्रवणामृतं तत्
    वाचालकाहळसहं बिरुदं तदा ते॥ ६.११ ॥

राज्यं तदा दशरथादनु रामतः प्राक्
    बिभ्राणया चरणरक्षिणि ! वीतखेदम्।
तुल्याधिकारभजनेन बभूव धन्यो
    वंशस्त्वयाऽम्ब ! मनुवंश महीपतीनाम्॥ ६.१२ ॥

वर्षाणि तानि वृषळो न तपांसि तेपे
    बालो न कश्चिदपि मृत्युवशं जगाम।

राज्ये तवाम्ब ! रघुपुङ्गवपादरक्षे !
नैवापरं प्रतिविधेयमभूत् प्रसक्तम्॥ ६.१३ ॥

विश्वं त्वदाश्रितपदाम्बुजसम्भवायां
यस्यां प्रतिष्ठितमिदं मणिपादरक्षे !।
आसीदनन्यशरणा समये यथावत्
साऽपि त्वया वसुमती विहितप्रतिष्ठा॥ ६.१४ ॥

प्रायेण रामविरहव्यथिता तदानीम्
उत्सङ्गमाश्रितवती तव राज्यलक्ष्मीः।
तामेव देवि ! ननु जीवयितुं जलार्द्राम्
अङ्गीचकार भवती भरतोपनीताम्॥ ६.१५ ॥

वीरव्रतप्रणयिनि प्रथमे रघूणां
प्राप्ते चिराय भरते व्रतमासिधारम्।
त्यक्त्वा पदावनि ! तदा विविधान् विहारान्
एकासिकाव्रतमपूर्वमवर्तयस्त्वम्॥ ६.१६ ॥

काकुत्स्थपादविरहप्रतिपन्नमौनां
निष्पन्दतामुपगतां मणिपादरक्षे !।
आश्वासयन्निव मुहुर्भरतस्तदानीं
शीतैरवीजयत चामरमारुतैस्त्वाम्॥ ६.१७ ॥

यत्र क्वचिद्विहरतोऽपि पदारविन्दं
रक्ष्यं मया रघुपतेरिति भावयन्त्या।
निश्शेषमेव सहसा मणिपादरक्षे !
निष्कण्टकं जगदिदं विदधे भवत्या॥ ६.१८ ॥

रामं त्वया विरहितं भरतं च तेन
त्रातुं पदावनि ! तदा यदभूत् प्रतीतम्।
रामानुजस्य तव चाम्ब ! जगत् समस्तं
जागर्ति तेन खलु जागरणव्रतेन॥ ६.१९ ॥

अन्तःपुरे परिजनैः समयोपयातैः
अभ्यर्चिता भवसि या विनयोपपन्नैः।
सा कोसलेश्वरपदावनि ! भूपतीनां
सङ्घट्टनं मकुटपङ्क्तिभिरन्वभूस्त्वम्॥ ६.२० ॥

प्राप्याधिकारमुचितं भुवनस्य गुप्त्यै
भद्रासनं भरतवन्दितमाश्रयन्त्या।
मध्येऽवतीर्णमिव माधवपादरक्षे !
मातस्त्वयाऽपि मनुवंशमहीपतीनाम्॥ ६.२१ ॥

राजासने रघुकुलोद्वहपादरक्षे !
नीराजनं समभवत् समयोचितं ते।
श्लाघावशेन बहुशः परिघूर्णिताभिः
सामन्तमौळिमणिमङ्गळदीपिकाभिः॥ ६.२२ ॥

पृथ्वीपतीनां युगपत् किरीटाः
प्रत्यर्थिनां प्रणितुमर्थिनां च।
प्रापुस्तदा राघवपादरक्षे !
त्वदीयमास्थानिकपादपीठम्॥ ६.२३ ॥

प्रणम्य रङ्गेश्वरपादरक्षे !
दूरोपनीतैरुपदाविशेषैः।
सभाजयन्ति स्म तदा सभायाम्
उच्चैस्तरामुत्तरकोसलास्त्वाम्॥ ६.२४ ॥

अपावृतद्वारमयन्त्रिताश्वं
रङ्गेशपादावनि ! पूर्वमासीत्।
त्वया यदृच्छासुखसुप्तपान्थं
रामे वनस्थेऽपि पदं रघूणाम्॥ ६.२५ ॥

अनन्यभक्तिर्मणिपादुके ! त्वाम्
अभ्यर्चयन् दाशरथिर्द्वितीयः।

विकल्प्यमानः प्रथमेन कीर्त्या
वन्द्यः स्वयं व्योमसदां बभूव॥ ६.२६ ॥

अरण्ययोग्यं पदमस्पृशन्ती
रामस्य राजार्हपदे निविष्टा।
आस्थाननित्यासिकया निरास्थः
स्वर्गौकसां स्वैरगतेर्विघातम्॥ २७ ॥

राजासने चेद्भवती निषण्णा
रङ्गेशपादावनि ! तन्न चित्रम्।
यत्राधिरूढाः क्रमशः पुरा त्वाम्
उत्तंसयन्ते रघुसार्वभौमाः॥ ६.२८ ॥

भद्रासनं चेत् परिवृत्तमासीत्
देवि ! क्षणं दक्षिणतोमुखं ते।
कथं भवेत् काञ्चनपादरक्षे !
रामस्य रक्षोमृगयाविहारः॥ ६.२९ ॥

यावत् त्वया राघवपादरक्षे !
जिगीषिता राक्षसराजधानी।
मालेव तावल्लुळिता मदान्धैः
उद्यानशाखामृगयूथपैस्ते॥ ६.३० ॥

महीक्षितां राघवपादरक्षे !
भद्रासनस्थां भवतीं स्पृशन्तः।
पूर्वं तथात्वे नियतेऽपि भूयः
कल्याणतामानशिरे किरीटाः॥ ६.३१ ॥

अनिच्छतः पाण्डरमातपत्रं
पित्रा वितीर्णं मणिपादरक्षे !।
आसीत् त्वदर्थं विधृतेन तेन
छाया समग्रा भरतस्य मौळौ॥ ६.३२ ॥

पादुके ! रघुपतौ यदृच्छया
प्रस्थिते वनविहारकौतुकात्।
आधिराज्यमधिगम्य ते युवाम्
अक्षतं वसुमतीमरक्षतम्॥ ६.३३ ॥

रघुवीरपदानुषङ्गमात्रात्
परिबर्हेषु निवेशिता यदि त्वम्।
अधिकारदिने कथं पुनस्ते
परिवारास्तव पादुके ! बभूवुः॥ ६.३४ ॥

पुरुषार्थचतुष्टयार्थिनीनां
परिषत् ते महिता वसिष्ठमुख्यैः।
क्रयविक्रयपट्टणं प्रजानाम्
अभवत् काञ्चनपादुके ! तदानीम्॥ ६.३५ ॥

मनुजत्वतिरोहितेन शक्ये
वपुषैकेन विरोधिनां निरासे।
अभजत् भरतादिभेदमीशः
स्वयमाराधयितुं पदावनि ! त्वाम्॥ ६.३६ ॥

मगधाङ्गकलिङ्गवङ्गमुख्यान्
विमतान् रन्ध्रगवेषिणः ससैन्यान्।
रघुपुङ्गवपादुके ! विजिग्ये
भरतः शासनमुद्वहन् भवत्याः॥ ६.३७ ॥

अनितरवहनीयं मन्त्रिमुख्यैर्यदा तत्
त्वयि विनिहितमासीत् सूर्यवंशाधिराज्यम्।
रघुपतिपदरक्षे ! रत्नपीठे तदानीं
श्रियमिव ददृशुस्त्वां सादरं लोकपालाः॥ ६.३८ ॥

परिहृतदण्डकाध्वगमनं पदरक्षिणि ! तत्
परिणतविश्वसम्पदुदयं युवयोर्हितयम्।

रघुपतिरत्नपीठमधिरुह्य तदा विदधे
　　व्यपगतवैरिभूपनिलयं वसुधावलयम्॥ ६.३९ ॥

प्राप्तोदया तदानीं किमपि तमस्तन्निराकरोत् भवती।
तनुरिव मनुकुलजनुषां प्रसवित्री रत्नपादुके ! सवितुः॥ ६.४० ॥

॥ इति श्रीपादुकासहस्रे अधिकारपरिग्रहपद्धतिः षष्टी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥